CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशाय नमः॥ ॐ श्रीसरस्वत्यै नमः॥ ॐ ऋषय ऊचुः॥ कथं सारस्वत
प्राप्तिः केन ध्यानेन सुव्रत। महासरस्वती येन तुष्टा भवति तद्वद॥ १॥ आ
श्वलायन उवाच॥ शृण्वंतु ऋषयः सर्वे गुह्याद्गुह्यतरं महत्। दशश्लोक्य
भिधं स्तोत्रं वदामि ध्यानपूर्वकं॥ अक्षशं चाक्षसूत्रं च पाशपुस्तकधा
रिणीं। मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजां॥ ३॥ शुद्धस्फटिकसंका
शां रविबिंबसमप्रभां॥ कुंदेंदुतुहिनाभासां हंसासनगतां शुभां॥ ४॥ सिते
न दर्पणाभेन वस्त्रेण परिभूषितां॥ जटाकलापसंयुक्तां पूर्णचंद्रनिभा
ननां॥ ५॥ सुस्तनीं वेदिमध्यां तां चंद्रार्धकृतशेखरां॥ त्रिलोचनां महादे
वीं स्वर्णनूपुरधारिणीं॥ ६॥ कटकैः स्वर्णरत्नाढ्यैर्महावलयभूषितां॥ के
यूरैर्मेखलाद्यैश्च द्योतयंतीं जगत्त्रयीं॥ ७॥ शब्दब्रह्ममयीं ध्यात्वा ये ध्या
नकामः समाहितः॥ वक्ष्ये सारस्वतं स्तोत्रं वाक्विभूतिकरं परं॥ ८॥
सा भारती प्रसन्ना स्यात् रमतां मम मुखांबुजे॥ अस्य श्रीवागीश्वरीद
शश्लोकी स्तोत्रमंत्रस्य आश्वलायन ऋषिः। अनुष्टुप् छंदः। श्रीवा
गीश्वरी देवता। यद्वागिति बीजं। देवीं वाचमिति शक्तिः। प्राणो देवीति
कीलकं॥ परब्रह्माधिदेवस्य वाक्प्रसादसिद्ध्यर्थे जपे विनियोगः॥

मा॰ ला॰ ३

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१ ॐ परब्रह्मात्मिकां देवीं भुक्तिमुक्तिफलप्रदां॥ प्रणम्य स्तौमि तामेव ज्ञानश
क्तिं सरस्वतीं॥ प्रणो देवीति मंत्रस्य भरद्वाज ऋषिः। सरस्वती देवता गाय
त्री छंदः मम वाक्प्रसादसिध्यर्थे जपे विनियोगः॥ ॐ प्रणो देवी सरस्वती।
वाजेभिर्वाजिनीवती॥ धीनामवित्र्यवतु॥ या वेदांतोक्ततत्वैकस्वरूपा पर
मार्थतः। नामरूपात्मना व्यक्ता सा मां पातु सरस्वती॥१॥ आनो दिव इति
मंत्रस्य अत्रिऋषिः सरस्वती देवता त्रिष्टुप् छंदः मम वाक्०॥ ॐ आ नो दि
वो बृहतः पर्वतादा सरस्वती यजता गंतु यज्ञं। हवं देवी जुजुषाणा घृता
ची शग्मां नो वाचमुशती शृणोतु॥ या सांगोपांगवेदेषु चतुर्ष्वेकैव गीय
ते। अद्वैता ब्रह्मणः शक्तिः सा मां०॥२॥ पावका न इति मंत्रस्य भरद्वाज ऋषिः
सरस्वती देवता गायत्री छंदः मम वा०॥ ॐ पावका नः सरस्वती वाजेभिर्वाजि
नीवती। यज्ञं वष्टु धियावसुः॥ या वर्णपदवाक्यार्थस्वरूपेण निगद्यते।
अनादिनिधना व्यक्ता सा मां पा०॥३॥ चोदयित्रीति मंत्रस्य मधुच्छंदा ऋ
षिः सरस्वती देवता गायत्री छंदः मम वा०॥ ॐ चोदयित्री सूनृतानां चेत
ती सुमतीनां॥ यज्ञं दधे सरस्वती॥ अध्यात्ममधि ~~[illegible]~~ दैवं च देवानां



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सम्यगीश्वरी। प्रत्यगात्मवदंतीया सा मां०॥४॥ महो अर्ण इति मंत्रस्य विश्वा
मित्र मधुछंदा ऋषिः सरस्वती देवता गायत्री छंदः मम वा०॥ ॐ महो अर्णः स
रस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति॥ अंतर्याम्यात्मना विश्वं त्रै
लोक्यं या नियच्छति। रुद्रादित्यादिरूपस्था सा मां पा०॥५॥ चत्वारि इति मंत्रस्य
उचथ्यपुत्रो दीर्घतमा ऋषिः सरस्वती देवता त्रिष्टुप् छंदः मम वा०॥ ॐ चत्वा
रि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहि
ता नेंगयंति तुरीयं वाचो मनुष्या वदंति॥ नामरूपात्मकं सर्वं यस्या
मावेश्य तां पुनः। ध्यायंति ब्रह्मरूपैका सा मां पा०॥६॥ उत त्व इति मंत्रस्य बृह
स्पति ऋषिः सरस्वती देवता त्रिष्टुप् छंदः मम वा० ॐ उत त्वः पश्यन्न दद
र्श वाचमुत त्वः शृण्वन्न शृणोत्येनां। उतो त्वस्मै तन्वां वि सस्रे जायेव
पत्य उशती सुवासाः॥ यां विदित्वाखिलं बंधं निर्मथ्याखिलवर्त्मना।
योगी याति परं स्थानं सा मां पा०॥७॥ यद्वाग् इति मंत्रस्य नेमो भार्गव ऋ
षिः वाग्देवता त्रिष्टुप् छंदः मम वा०॥ ॐ यद्वाग्वदंत्यविचेतनानि रा
ष्ट्री देवानां निषसाद मंद्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः प

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



रमंत गाम॥ नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता॥ निर्विकल्पात्म
नैकैव सा मां पा०॥ च॥ देवी वाचमिति मंत्रस्य नेमो भार्गव ऋषिः वाग्देव
ता त्रिष्टुप् छंदः मम वा० ॐ देवीं वाचमजनयंत देवास्तां विश्वरूपाः प
शवो वदंति। सा नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु॥ व्य
क्ताव्यक्तगिरः सर्वे देवाद्या व्याहरंति यां॥ सर्वकामदुघा धेनुः सा मां पा०९
ॐ बितम इति मंत्रस्य गृत्समद ऋषिः वाग्देवता अनुष्टुप् छंदः मम वा०
ॐ अंबितमे नदीतमे देवितमे सरस्वति। अप्रशस्ता इव स्मसि प्रश
स्तिमंब नस्कृधि॥ या प्रत्यक्दृष्टिभिर्जीवैर्व्यज्यमानानुभूयते।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती॥११॥ पद्मपत्रविशालाक्षी
पद्मकेसरवर्णिनी। नित्यं पद्मालया देवी सा मां पातु सरस्वती॥१२॥
यः कवित्वं निरातंकं भुक्तिमुक्ती च वांछति। सोऽभ्यर्च्यैनां दशश्लोक्या
भक्त्या स्तौतु सरस्वतीं॥१३॥ तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्व
तीं। भक्तिश्रद्धाभियुक्तस्य षण्मासात्प्रत्ययो भवेत्॥१४॥ ततः प्रव



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तंते वाणी स्वेच्छया लीलिताक्षरा॥ गद्यपद्यादिकैः शब्दैः प्रथमेवं च विव
क्षते॥१५॥ अश्रुतं बुध्यते ग्रंथं प्रायः सारस्वतः कविः॥ श्रुतं च धारये
दाशु स्खलद्धीः स्पृष्टवा भवेत्॥१६॥ विख्यातः सर्वलोकेषु वाग्मी भ
वति पूजितः॥ अजेयः प्रतिपक्षाणां स्वयं जेता च जायते॥१७॥ स्वयूथे
वेदवादे वा विवादे प्रस्तुते सति॥ अहं वा न स्पति विष्णुः शिवो वास्मीति
दृ भावयेत्॥१८॥ एवं भावयता तेन बृहस्पतिरपि स्वयं॥ न शक्नोति सम्मु
खं कुं नरेष्वन्येषु का कथा॥१९॥ न कांचन स्त्रियं निंदन् देवान्नापि च
द्विजान्॥ अनार्यैर्नाभिभाषेत सर्वत्रैव क्षमी भवेत्॥२०॥ सर्वत्रैव स्त्रि
यं ब्रूयाद्यदिच्छेत्सिद्धिमात्मनः॥ श्लोकैरेव तिरस्कुर्याद्द्विषंतं प्रतिवादि
नं॥२१॥ प्रतिवादिगजानां च सिंहो भवति मानवः॥ तस्मात्सर्वप्रयत्नेन
पूज्या देवी सरस्वती॥२२॥ यद्वाग्गितितच्चेनैव देवी चोच्चेपति सर्वतः॥
तस्य नासंस्कृता वाणी मुखान्निःसरति क्वचित्॥२३॥ नमामि यामि
नीनाथलेखालंकृतकुंतलां॥ भवानीं भवसंतापनिर्वापणसुधानदीं॥२४॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

याकुंदेंदुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदंडमंडितकरा या श्वेतपद्मा
सना॥ या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वंदिता सा मां पातु सरस्वती भगवती
निःशेषजाड्यापहा॥२५॥ दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना॥
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण॥२६॥ या सा कुंदेंदुशंखस्फटिकम
णिनिभा भासमाना समाना सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना॥२७॥ य
स्याः स्मरणमात्रेण वाग्विभूतिर्विभज्यते॥ सा भारती चिरं नित्यं रमतां मन्मुखांबुजे॥२८॥
शरदिंदुविकासिमंदहासां लसदिंदीवरलोचनाभिरामां॥ अरविंदसमानसुंद
रास्यामरविंदासनसुंदरीमुपासे॥२९॥ श्रीमच्चंदनचर्चितोज्ज्वलवपुः शुक्लांबरा मल्लि
कामालोल्लकलशेखरप्रविलसन्मुक्तावली शोभना॥ सर्वज्ञानविधानपुस्तकधृ
रारुद्राक्षमालाधरा वाग्देवी वदनांबुजे वसतु मे त्रैलोक्यमाता वरा॥३०॥ अमल
कमलसंस्था लेख[illegible]निपुस्तकोद्यत्करयुगलसरोजा कुंदमंदारगौरा॥ अभि
नवशशिखंडोल्लासिकोटीरजूटा भवतु भवभयानां भंगिनी भारती नः॥३१॥
नमस्यामि जगद्वंद्यां कल्लवाऽऽश्रयमातृकां॥ स्थूलां सूक्ष्मां शिवां घोरां सर्वाकारां
सरस्वती॥३२॥ पाशांकुशधरा देवी वीणापुस्तकधारिणी॥ मम वक्त्रे वसेन्नित्यं दुग्ध



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दुग्धकुंदेंदुनिर्मला॥३२॥ चतुर्भुजे चंद्रकलावतंसे कुचोन्नते कुंकुमरागशोणे पुंड्रेक्षुचापकुशपु
ष्पबाण हस्ते नमस्ते जगदेकमातः॥३३॥ पुस्तकजपवटहस्ते वरदाभयचिह्नवाहुतले। सि
दूररूपदेहवागीश्वरी शोधयाशुमे चेतः॥३४॥ इत्याश्वलायनंदद्दं निजगाद देव्या
स्तोत्रं समस्तफलभोगनिदानभूतं॥ एतत्पठन्द्विजवरः कवितामुपैति संध्यासुवांछि
तफलान्युपयाति शीघ्रं॥३५॥ यस्याः पाणितले सरोजममलं तस्यां तराले रमा
द्र्वितन्निकटे पुराणपुरुषः स्तन्नाभिपद्मे विधिः॥ तद्वक्त्रे निगमावली विलसि
तातेन क्रतूनां क्रियास्ताभिर्जीवति देवतासमुदयः सा भारती पातु नः॥३६॥॥
इत्याश्वलायनप्रोक्तं सरस्वती स्तोत्रं संपूर्णं॥॥ श्रीकृष्णार्पणमस्तु॥



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi